**സമഗ്ര ചോദ്യോത്തരങ്ങൾ**

**Chapter Name:रागसुधारस ......।** *Marks :(4)*

**Quest:**

**सूचनाः उपयुज्य स्वातिमहाराजम् अधिकृत्य लिखत ।**

सूचनाः - केरलीयः - संगीतज्ञः - भरणकर्ता - गर्भश्रीमान् - कलोपासकः - कीर्त्तनानि - सङ्गीतकलापरिपोषणम् ।

**Hint:**

**आदर्श उत्तरम्**

**स्वातितिरुनाल् महाराजः**

अयं महाशयः केरलीयः प्रसिद्धः संगीतज्ञः भवति। सः भरणकर्ता च आसीत् । तस्य प्रतिभावेभवेन सः गर्भश्रीमान् इति नाम्ना प्रसिद्धिं प्रासवान्। कलोपासकः अयं अनेकानि कीर्तनानि व्यरचयत्। अयं महाशयः नकेवलं उत्तमः भरणकर्ता किन्तु सङ्गीतकलापरिपोषकः च आसीत् । संङ्गीत कलामण्डले अयं महाशयः प्रातस्मरणीयः भवति।

**मूल्यनिर्णयसूचकाः**

* आशयग्रहणाय -१

* उचितलेखनाय -२

* भाषाशैली -१

**Chapter Name:रागसुधारस ......।** *Marks :(4)*

**Quest:**

**गद्यांशं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत ।**

कर्णाटकसङ्गीतलोके विश्वप्रसिद्धाः अनेके संगीतज्ञाः सन्ति । तेषु मूर्त्तित्रयं भवति त्यागराजस्वामी , मुत्तुस्वामिदीक्षितः , श्यामशास्त्री च । "एन्तरो महानुभावलु ....” इति प्रसिद्धकीर्त्तनस्य रचयिता भवति त्यागराजः । " वातापि गणपतिम् ..." इत्यस्य कर्त्ता मुत्तुस्वामिदीक्षितश्चास्ति । चिन्तामणिरागस्य प्रयोक्तृषु प्रसिद्धोस्ति श्यामशास्त्री।

क) संगीतलोके मूर्तित्रयमिति प्रसिद्धाः के ?

ख) " एन्तरो महानुभावलु ... " इति कीर्त्तनस्य कर्ता कः ?

ग) मुत्तुस्वामिदीक्षितेन रचितं प्रसिद्धं कीर्त्तनं किम् **?**

घ) चिन्तामणिरागस्य प्रयोगसमर्थः संगीतज्ञः कः ?

**Hint:**

क) त्यागराजस्वामी , मुत्तुस्वामिदीक्षितः , श्यामशास्त्री।

ख) "एन्तरो महानुभावलु ....” इति प्रसिद्धकीर्त्तनस्य रचयिता भवति त्यागराजः ।

ग) " वातापि गणपतिम् ..." इत्यस्य कर्त्ता मुत्तुस्वामिदीक्षितश्चास्ति

घ) चिन्तामणिरागस्य प्रयोक्तृषु प्रसिद्धोस्ति श्यामशास्त्री।

**उत्तरसूचक:**

उचितोत्तरलेखनाय - एकैकोऽङ्कः।

**Chapter Name:रागसुधारस ......।** *Marks :(4)*

**Quest:**

**खण्डिकां पठित्वा संभाषणे रिक्तांशान् पूरयत -**

चतुष्षष्टिकलासु अतिप्रसिद्धं भवति संगीतम्। तत्र कर्णाटकसंगीतलोके प्रतिभाधनः केरलीयः भवति षट्कालगोविन्दमारार् । षट्सुकालेषु गातुं सामर्थ्यम्

अस्तीत्यतः सः षट्काल इति विशेषणं सम्पादितवान् । स्वातिमहाराजस्य त्यागराजस्वामिनः च समकालिकः आसीदयं महानुभावः । अस्य आलापनवैभवं ज्ञात्वा " एन्तरो महानुभावलु " इति श्रीरागकीर्त्तनेन त्यागराजस्वामी तमपूजयत् ।

छात्रः - वन्दनं गुरो ! कर्णाटकसङ्गीते प्रसिद्धाः केरलीयाः के ?

अध्यापकः - स्वातिमहाराजः,........., चेम्पै वैद्यनाथभागवतरः इत्यादयः महानुभावाः । छात्रः - आचार्य ! गोविन्दमारारः कथं

षट्काल इति विशेषणं सम्पादितवान् ?

अध्यापकः - ............................................................।

छात्रः - ............................................................ ?

अध्यापकः - सत्यम् ! सः स्वातिमहाराजस्य समकालिकः एव ।

छात्रः - कीर्त्तनालापनेन त्यागराजस्वामी गोविन्दमारार् महाशयं पूजितवानिति श्रूयते । तत्कीर्त्तनं किम् ?

अध्यापकः - -------------------------------------------------------------।

छात्रः - आचार्य ! धन्यवादः ।

अध्यापकः - अस्तु , धन्यवादः ।

**Hint:**

**उत्तरसूचक:**

उचितोत्तरलेखनाय — एकैकोऽङ्कः।

**Chapter Name:रागसुधारस ......।** *Marks :(4)*

**Quest:**

**पत्रवार्त्तां पठित्वा जीवनचरितरूपरेखां लिखति ।**

**<u>दक्षिणामूर्त्तिः कथावशेषोऽभवत् ।</u>**

**संस्कृतसुधा**

**२०१३ आगस्त् -**

चेनै - सुप्रसिद्धः कर्णाटकसङ्गीतज्ञः दक्षिणामूर्तिः ह्यः तमि नाटुराज्ये मृतिमुपगतवान् । तमिल् , मलयालम् , हिन्दी भाषासु संगीतसंविधानं कृतवानयं संगीतलोकस्य वरदानमेव आसीत् । जे सी दानियेल् पुरस्कारेण ,संगीतसरस्वती पुरस्कारेण , स्वातितिरुनाल् पुरस्कारेण च सम्मानितोयम् महानुभावः । सोऽयं १९१९ तमे वर्षे डिसम्बर् मासे नवमे दिने आलप्पुषाजिल्लायां हरिप्पाट् ग्रामे जनिमलभत । वेङ्कटेश्वर अय्यर् पार्वती अम्माल् दम्पत्योः पुत्रत्वेन लब्धजन्मनः अस्य जीविनं संगीतपरिपोषणायैव समर्पितमासीत् ।

नाम -

जननम् -

पितरौ -

कर्मक्षेत्रम् -

पुरस्काराः -

देहवियोगः -

**Hint:**

**मूल्यनिर्णयसूचकाः**

* आशयग्रहणाय -२

* उचितलेखनाय -२

**Chapter Name:रागसुधारस ......।** *Marks :(2)*

Quest:

**उदाहरणं पठित्वा रिक्तस्थाने क्त्वान्त-ल्यबन्त-तुमुन्नन्तपदैः पूरयत ।**

उदा - महाराजस्य आदेशं श्रुत्वा अपि त्यागराजः राजप्रशस्तिपरां कृतिं विरच्य प्रदातुं सन्नद्धो नाभवत् ।

**१**. रमेशः विद्यालयं ---------(गच्छति ) कक्ष्याम् --------(उपविशति )-------------- (पठति ) आरभत ।

**२**. हरिः भक्षणं --------( खादति ) मुखं ---------( प्रक्षालयति )---------(क्रीडति) क्रीडाङ्कणम् अगच्छत्।

**३**. माता प्रातः एव स्नानं -----------( करोति ) पाकशालां -----------( प्रविशति ) पाकं ----------(करोति ) आरभत ।

Hint:

**उत्तराणि**

१. रमेशः विद्यालयं **गत्वा** कक्ष्याम् **उपविश्य पठितुम्** आरभत ।

२. हरिः भक्षणं **खादित्वा** मुखं **प्रक्षाल्य क्रीडितुं** क्रीडाङ्कणम् अगच्छत्।

३. माता प्रातः एव स्नानं **कृत्वा** पाकशालां **प्रविश्य** पाकं **कर्तुम्** आरभत ।

Chapter Name:**रागसुधारस ......।** *Marks :(1)*

Quest: **कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत। कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।**

१) " एन्तरो महानुभावलु " इति कीर्त्तनं कस्मिन् रागे निबद्धम्?

(भूपालरागं , हंसध्वनिरागं , हिन्दोलरागं , श्रीरागं )

२) एन्तरो महानुभावलु इति कीर्त्तनं कं प्रकीर्त्त्य आलपति स्म?

(शरभोजीनं , षट्कालगोविन्दमारारं, त्यागराजस्वामीनं , स्वातितिरुनाल् राजं)

३) संगीतविद्यायाः नामान्तरं किम् ?

(धनुर्विद्या , गान्धर्ववि‌द्या ,शिल्पविद्या , वास्तुविद्या )

४) निधिचालसुखमा ..... इति कृतिः कस्मिन् रागे रचितं भवति ?

( कल्याणिरागे , भूपालरागे , श्रीरागगे , हंसध्वनिरागे )

५) कां वृत्तिम् आश्रित्य त्यागराजः जीवितम् अनयत् ?

(उञ्छवृत्तिं , कार्षिकवृत्तिं , शिल्पवृत्तिं , व्यावसायिकवृत्तिं )

६) त्यागराजं द्रष्टुमागतः केरलीयसंगीतज्ञः कः?

(षट्कालगोविन्दमारार्, स्वातितिरुनाल्, चेम्पै वैद्यनाथः, देवराजः)

७) त्यागराजेन विरचिता हिन्दोलरागानिबद्धा कृतिः कस्यां भाषायाम् आसीत्?

(मलयालभाषायाम्, कन्नटभाषायाम्, तेलुगुभाषायाम्, संस्कृतभाषायाम्)

८) शरभोजी कस्य देशाधिपः आसीत्?

(तिरुवय्यार् देशस्य, तञ्चावूर्देशस्य, कन्नटादेशस्य, तेलुगुदेशस्य)

**Hint:**

**उत्तराणि**

१) श्रीरागम्।

२) षट्कालगोविन्दमाराम्।

३) गान्धर्वविद्या।

४) कल्याणिरागे।

५) उञ्छवृत्तिम्।

६) षट्कालगोविन्दमारार्।

७) संस्कृतभाषायाम्।

८) तञ्चावूर्देशस्य।

**Chapter Name:रागसुधारस ……।** *Marks :(5)*

**Quest:**

**यथोचितं योजयत।**

**क.** सामजवरगमन - तञ्जावूर् देशाधिपः

शरभोजी - सरसीभवम्

त्यागराजः - हिन्दोलम्

सारसम् - वासं कृत्वा

उषित्वा - नादोपासकः

**ख**. सामजः - समर्थः

विशारदः - शिलाहरणम्

उञ्छवृत्तिः - गजः

कीर्त्तिः - क्त्वान्तं

कृत्वा - प्रशस्तिः

Hint:

**उत्तराणि**

**क.** सामजवरगमन - हिन्दोलम्

शरभोजी - तञ्जावूर् देशाधिपः

त्यागराजः - नादोपासकः

सारसम् - सरसीभवम्

उषित्वा - वासं कृत्वा

**ख.** सामजः -गजः

विशारदः -समर्थः

उञ्छवृत्तिः -शिलाहरणम्

कीर्त्तिः -प्रशस्तिः

कृत्वा -क्त्वान्तं

Chapter Name:**रागसुधारस ......।** *Marks :(1)*

Quest:

**उदाहरणानुसारं विश्लेषयत ।**

**तेनैव - तेन + एव**

क) अनेनैव - ----- + ----------

**तच्च - तत् + च**

ख) अवदच्च - ----- + ----------

**केयम् - का + इयम्**

ग) प्रसारितेति - ----- + ----------

**चन्द्र इव - चन्द्रः + इव**

घ) सूर्य इव - ----- + ----------

**केयम् - का +इयम्।**

ङ) सेयम् - ----- + ----------

**तेनैव - तेन+ एव।**

च) केनैव - ----- + ----------

**तेषु +अन्यतमः- तेष्वन्यतमः।**

छ) तेषु +अपि - ----- + ----------

ज) तेषु+ अनेन - ----- + ----------

**नादोपसकस्यास्य — नादोपसकस्य अस्य।**

झ) महाशयस्यास्य - --------+-------।

ञ) पाठस्यास्य - ----------+-----।

**दारिद्र्यात् +उद्धर्तुं - दारिद्र्यादुद्धर्तुम्।**

ट) पापात् +उद्धर्तुं - ----------+-----।

ठ) पाठात्+ उद्धर्तुं - ----------+-----।

**Hint:**

**उत्तराणि**

क) अनेन +एव

ख) अवदत् +च

ग) प्रसारिता +इति

घ) सूर्यः +इव

ङ) सा +इयम्।

च). केन+ एव।

छ) तेष्वपि।

ज) तेष्वपि।

झ) महाशयस्य+अस्य।

ञ) पाठस्य+ अस्य।

ट) पापादुद्धर्तुम्।

ठ) पाठादुद्धर्तुम्।